This Booklet contains 16 printed pages.
এই প্রশ্নপত্রে **16** মুদ্রিত পৃষ্ঠা আছে।

# AN18—XX

**Question Booklet No.**
প্রশ্ন-পুস্তিকা সংখ্যা

## EXAMINATION—STPGT

## SUBJECT : SANSKRIT

Do not open this Question Booklet until you are asked to do so.
এই প্রশ্নপত্র যতক্ষণ খুলতে না বলা হবে ততক্ষণ পর্যন্ত খুলবেন না।

Read carefully all the instructions given at the back page and on the front page of this Question Booklet.
এই প্রশ্নপত্রের শেষ পৃষ্ঠা ও প্রথম পৃষ্ঠায় দেওয়া সমস্ত নির্দেশাবলী মনোযোগ সহকারে পড়ুন।

| *Instructions for Candidates* | *পরীক্ষার্থীদের জন্য নির্দেশাবলী* |
|---|---|
| **1.** Use **Black Ballpoint Pen only** for writing particulars of this Question Booklet and marking responses on the OMR Answer Sheet. | **1.** এই প্রশ্নপত্রে লেখার জন্য এবং OMR উত্তরপত্রে উত্তর চিহ্নিত করতে **শুধুমাত্র কালো কালির বলপয়েন্ট কলম** ব্যবহার করুন। |
| **2.** This test is of **2 hours** and **30 minutes** duration and consists of **150** MCQ-type questions. Each question carries 1 mark. | **2.** এই পরীক্ষার সময় **2 ঘণ্টা 30 মিনিট**। পরীক্ষায় মোট **150** টি MCQ ধরনের প্রশ্ন থাকবে। প্রতি প্রশ্নের মূল্যাঙ্ক 1 হবে। |
| **3.** There is no negative marking for any wrong answer. | **3.** ভুল উত্তরের জন্য কোনো ঋণাত্মক নম্বর থাকবে না। |
| **4.** Rough work should be done only in the space provided in the Question Booklet. | **4.** পরীক্ষার্থীকে রাফ ওয়ার্ক করতে হবে শুধুমাত্র কোশ্চেন বুকলেটে (প্রশ্নপত্রে) নির্দিষ্ট করা স্থানে। |
| **5.** The answers are to be marked on the OMR Answer Sheet only. Mark your responses carefully since there is no chance of alteration/correction. | **5.** প্রশ্নের উত্তর শুধুমাত্র OMR উত্তরপত্রে চিহ্নিত করতে হবে। উত্তর চিহ্নিত করার বিষয়ে পরীক্ষার্থীকে সর্বোচ্চ সতর্কতা অবলম্বন করতে হবে। প্রশ্নের উত্তর একবার চিহ্নিত করা হয়ে গেলে কোনো অবস্থাতেই তাকে পরিবর্তন বা সংশোধন করা যাবে না। |
| **6.** Use of eraser or whitener is strictly prohibited. | **6.** কালি-মোচনীয় ইরেজার বা সাদা তরল-জাতীয় বস্তুর ব্যবহার সম্পূর্ণরূপে নিষিদ্ধ। |

Name of the Candidate (in Capitals) : ______________________
পরীক্ষার্থীর নাম (বড় অক্ষরে)

Roll No. : ______________________
রোল নং

OMR Answer Sheet No. ______________________
OMR উত্তরপত্রের নম্বর

*Full Signature of the Candidate with date*
*পরীক্ষার্থীর সম্পূর্ণ স্বাক্ষর তারিখসহ*

*Signature of the Invigilator with date*
*নিরীক্ষকের স্বাক্ষর তারিখসহ*

**सूचना**—अस्मिन् प्रश्नपत्रे **पञ्चाशदधिकं शतं (150)** बहुवैकल्पिकाः प्रश्नाः सन्ति। प्रत्येकं प्रश्नस्य *1* अङ्कः वर्तते। **सर्वे** प्रश्नाः समाधेयाः।

**1.** माहेश्वरसूत्राणि अवलम्ब्य व्याकरणे कति प्रत्याहाराः गृहीताः?

(A) चतुश्चत्वारिंशत्

(B) एकोचत्वारिंशत्

(C) पञ्चाशत्

(D) चतुर्दश

**2.** ऋग्वेदस्य कस्मिन् मण्डले विद्यते संज्ञानसूक्तम्?

(A) प्रथमे मण्डले

(B) दशमे मण्डले

(C) सप्तमे मण्डले

(D) न कस्मिन्नपि

**3.** ''अतीतादिव्यवहारहेतुः _____'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) आकाशः

(B) वायुः

(C) कालः

(D) न किमपि

**4.** अधोलिखितेषु माहेश्वरसूत्रेषु कस्मिन् सूत्रे 'अ' इति वर्णः इत्-वर्णरूपेण गृहीतः?

(A) अ इ उ ण्

(B) ए ओ ङ्

(C) ल ण्

(D) ह य व र ट्

**5.** हिरण्यगर्भसूक्तस्य देवतायाः नाम किम्?

(A) प्रजापतिः

(B) पृथिवी

(C) इन्द्रः

(D) अग्निः

**6.** तर्कसंग्रहानुसारं 'भूतले घटो नास्ति' इत्यत्र अभावः भवति

(A) प्रागभावः

(B) अत्यन्ताभावः

(C) अन्योन्याभावः

(D) प्रध्वंसाभावः

**7.** 'ओ' इति वर्णः अधोलिखितेषु कस्मिन् प्रत्याहारे वर्तते?

(A) अक्

(B) एच्

(C) ऐच्

(D) न कस्मिन्नपि

**8.** ''यथा वः सुसहासति'' इत्यत्र 'असति' इति वैदिकक्रियापदस्य लौकिकसंस्कृते रूपं भवति

(A) भवति

(B) अस्ति

(C) सन्ति

(D) न किमपि

**9.** संयोगनाशको गुणः किम्?

(A) विभागः

(B) रसः

(C) स्पर्शः

(D) रूपम्

**10.** जश् इति प्रत्याहारे कः वर्णवर्गः वर्तते?

(A) ज ब ग ड द

(B) घ ढ ध ज ब ग ड द

(C) ञ म ङ ण न

(D) न किमपि

**11.** उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि॥

अस्मिन् मन्त्रे किं छन्दः उपलभ्यते?

(A) वृहती

(B) जगती

(C) गायत्री

(D) न किमपि

**12.** तर्कसंग्रहानुसारम् अधोलिखितेषु कस्य भेदः नास्ति?

(A) सामान्यस्य

(B) अभावस्य

(C) समवायस्य

(D) गुणस्य

**13.** ''अकुहविसर्जनीयानां _____।'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) मूर्धा

(B) तालु

(C) कण्ठः

(D) न किमपि

**14.** अनुष्टुप्-छन्दसि कति अक्षराणि भवन्ति?

(A) चतुर्विंशतिः

(B) द्वात्रिंशत्

(C) द्वाचत्वारिंशत्

(D) अष्टाविंशतिः

**15.** अधोलिखितासु उपनिषत्सु का उपनिषद् मन्त्रोपनिषद् इति नाम्ना प्रसिद्धा?

(A) कठोपनिषद्

(B) ईशोपनिषद्

(C) श्वेताश्वतरोपनिषद्

(D) केनोपनिषद्

**16.** 'ज' इति वर्णस्य उच्चारणस्थानं किम्?

(A) मूर्धा

(B) नासिका

(C) तालु

(D) न किमपि

**17.** अधोलिखितेषु किं सूत्रं न वैदिकस्वरसम्बद्धम्?

(A) तिङ्ङतिङः

(B) उदात्तादनुदात्तस्य स्वरितः

(C) अनुदात्तौ सुप्पितौ

(D) वृद्धिरादैच्

**18.** ''उत्तिष्ठत जाग्रत प्राप्य वरान् निवोधत''—कस्याम् उपनिषदि प्राप्यते एष मन्त्रांशः?

(A) कठोपनिषदि

(B) प्रश्नोपनिषदि

(C) मुण्डकोपनिषदि

(D) वृहदारण्यकोपनिषदि

**19.** गुणे 'उ'-वर्णस्य किं रूपं भवति?

(A) ओ

(B) ए

(C) अल्

(D) न किमपि

**20.** अभिज्ञानशकुन्तलस्य प्रस्तावनानुसारतः कस्मिन् काले नाटकमिदम् अभिनीतम्?

(A) वसन्तकाले

(B) ग्रीष्मकाले

(C) शरत्काले

(D) वर्षाकाले

**21.** ऐतरेयब्राह्मणं केन वेदेन सम्बद्धम्?

(A) अथर्ववेदेन

(B) यजुर्वेदेन

(C) ऋग्वेदेन

(D) न केनापि

**22.** पाणिनिविरचिते 'अष्टाध्यायी'-ग्रन्थे प्रथमं सूत्रं किम्?

(A) अदेङ् गुणः

(B) वृद्धिरादैच्

(C) हलन्त्यम्

(D) न किमपि

**23.** ''भवितव्यानां द्वाराणि भवन्ति सर्वत्र''

अभिज्ञानशकुन्तलमिति नाटकस्य कस्मिन् अङ्के विद्यते इयं पङ्क्तिः?

(A) सप्तमे अङ्के

(B) पञ्चमे अङ्के

(C) चतुर्थे अङ्के

(D) प्रथमे अङ्के

**24.** तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रचोदयात्॥

गायत्रीमन्त्रोऽयं कस्मिन् वेदे उपलभ्यते?

(A) ऋग्वेदे

(B) सामवेदे

(C) अथर्ववेदे

(D) न कस्मिन्नपि

**25.** वाचः + पतिः > वाचस्पतिः —अत्र 'स' इति वर्णस्य अधोलिखितेषु किं नाम सम्बद्धम्?

(A) आदेशः

(B) आगमः

(C) प्रगृह्यम्

(D) न किमपि

**26.** अभिज्ञानशकुन्तले नाटके करभकः कः आसीत्?

(A) विदूषकः

(B) मृगशिशुः

(C) सिंहशिशुः

(D) वार्तावाहकः

**27.** कः वेदाङ्गः संस्कृतसाहित्ये सूत्रसाहित्यस्य उत्सरूपेण स्वीक्रियते?

(A) शिक्षा

(B) छन्दः

(C) कल्पः

(D) निरुक्तः

**28.** र्-वर्णस्य सम्प्रसारणे किं रूपं भवति?

(A) इ

(B) उ

(C) ऋ

(D) न किमपि

**29.** ''अनिर्वर्णनीयं परकलत्रम्''—कस्य उक्तिरियम्?

(A) विदूषकस्य

(B) दुष्यन्तस्य

(C) कण्वस्य

(D) न कस्यापि

**30.** निरुक्तग्रन्थस्य रचयिता कः?

(A) सायणाचार्यः

(B) यास्काचार्यः

(C) पाणिनिः

(D) न कोऽपि

**31.** 'सुधी'-शब्दस्य सम्बोधने एकवचने किं रूपं भवति?

(A) सुधी

(B) सुधि

(C) सुधीः

(D) न किमपि

**32.** को नाम उष्णोदकेन नवमल्लिकां सिञ्चति—अत्र नवमल्लिकापदेन निर्देशिता

(A) प्रियंवदा

(B) अनसूया

(C) शकुन्तला

(D) गौतमी

**33.** ऋग्वेदस्य प्रथमे मण्डले कति सूक्तानि वर्तन्ते?

(A) एकनवत्यधिकं शतम्

(B) द्विषष्टिः

(C) ऊनचत्वारिंशत्

(D) सप्ताशीतिः

**34.** 'गो'-शब्दस्य प्रथमाविभक्तेः एकवचने रूपं किम्?

(A) गौः

(B) गौ

(C) गोः

(D) न किमपि

**35.** अधोलिखितेषु भारवेः किरातार्जुनीयस्य प्रसिद्धः टीकाकारः कः?

(A) मेधातिथिः

(B) मल्लिनाथः

(C) गोविन्दराजः

(D) न कोऽपि

**36.** अधोलिखितेषु दार्शनिकसूक्तं किम्?

(A) संज्ञानसूक्तम्

(B) अक्षसूक्तम्

(C) नासदीयसूक्तम्

(D) न किमपि

**37.** 'युवन्'-शब्दस्य द्वितीयाविभक्तेः बहुवचने रूपं भवति

(A) युवा

(B) यूनः

(C) युवानम्

(D) न किमपि

**38.** न बाधतेऽस्य त्रिगणः परस्परम्—अत्र 'त्रिगण' पदेन किं बुध्यते?

(A) धर्मार्थकामाः

(B) कामक्रोधलोभाः

(C) शब्द-स्पर्श-रूपाणि

(D) न किमपि

**39.** ऋग्वेदे अक्षसूक्तं भवति

(A) धर्मनिरपेक्षसूक्तम्

(B) दार्शनिकसूक्तम्

(C) संवादसूक्तम्

(D) न किमपि

**40.** 'वणिज्'-शब्दस्य षष्ठीविभक्तेः बहुवचने पदं किम्?

(A) वणीजाम्

(B) वणिक्षु

(C) वणिजाम्

(D) न किमपि

**41.** "कथं त्वमेतौ धृतिसंयमौ यमौ ..."

अत्र 'यमौ' इति पदेन कौ लक्षितौ?

(A) भीमार्जुनौ

(B) अर्जुननकुलौ

(C) नकुलसहदेवौ

(D) युधिष्ठिरभीमौ

**42.** अभिचारमूलकमन्त्राः कस्मिन् वेदे उपलभ्यन्ते?

(A) सामवेदे

(B) यजुर्वेदे

(C) अथर्ववेदे

(D) न कस्मिन्नपि

**43.** 'अदस् (स्त्री०)'-शब्दस्य प्रथमाविभक्तेः एकवचने रूपं भवति

(A) असौ

(B) ईयम्

(C) एषा

(D) न किमपि

**44.** 'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किम्?

(A) अर्जुनसमागमः

(B) युधिष्ठिरसमागमः

(C) वनेचरसमागमः

(D) द्रौपदीसमागमः

45. महाभारतस्य किं पर्व श्रीमद्भगवद्गीतायाः उत्सरूपेण प्राप्यते?

(A) भीष्मपर्व

(B) वनपर्व

(C) शान्तिपर्व

(D) स्वर्गारोहणपर्व

46. हस्-धातोः लिट्-लकारे प्रथमपुरुषस्य एकवचने किं रूपं भवति?

(A) जहास

(B) जहस

(C) जहसुः

(D) न किमपि

47. ''महती देवता ह्येषा _____ तिष्ठति।'' अत्र रिक्तस्थाने किं पदं वर्तते?

(A) नृपरूपेण

(B) नररूपेण

(C) दण्डरूपेण

(D) न किमपि

48. संस्कृतमहाभारतस्य रचयिता कः?

(A) काशीरामदासः

(B) महर्षिः कृष्णद्वैपायनः वेदव्यासः

(C) तुलसीदासः

(D) न कोऽपि

49. जागृ-धातोः लट्-लकारे प्रथमपुरुषस्य एकवचने रूपं भवति

(A) जाग्रति

(B) जागर्ति

(C) जागर्षि

(D) न किमपि

50. मनुसंहितानुसारं कः प्रजाः वशे स्थापयितुं शक्नोति?

(A) अलसः नृपः

(B) सुदर्शनः नृपः

(C) जितेन्द्रियः नृपः

(D) न कोऽपि

51. ''मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः''—अस्य श्लोकांशस्य रचयिता कः?

(A) वाल्मीकिः

(B) व्यासदेवः

(C) कालिदासः

(D) न कोऽपि

52. श्रु + लोट् + हि = रूपं भवति किम्?

(A) शृणु

(B) शृणुहि

(C) शृणोषि

(D) न किमपि

53. मनुसंहितानुसारं ग्रामे समुत्पन्नान् दोषान् कः प्रतिकरोति?

(A) प्रजापालकः

(B) ग्रामिकः

(C) नागरिकः

(D) न कोऽपि

54. वाल्मीकिः कस्य आदेशेन रामायणं रचितवान्?

(A) ब्रह्मणः

(B) विष्णोः

(C) शिवस्य

(D) न कस्यापि

**55.** भू-धातोः विधिलिङ्-लकारे प्रथमपुरुषस्य बहुवचने रूपं किम्?

(A) भवेत्

(B) भवेयुः

(C) भवेयम्

(D) न किमपि

**56.** मनुसंहितानुसारं पार्ष्णिग्राहः कः?

(A) पृष्ठवर्ती नृपतिः

(B) दूरदर्शी नृपतिः

(C) आमन्त्रितः नृपतिः

(D) न कोऽपि

**57.** पुराणसाहित्ये कति उपपुराणानि वर्तन्ते?

(A) द्वादश

(B) पञ्चदश

(C) अष्टादश

(D) विंशतिः

**58.** हन्-धातोः लङ्-लकारे प्रथमपुरुषस्य एकवचने रूपं भवति

(A) अहनम्

(B) अघ्नन्

(C) अहन्

(D) न किमपि

**59.** ''चतुर्णामाश्रमाणाञ्च धर्मस्य प्रतिभूः स्मृतः''—अत्र कः प्रतिभूः?

(A) राजा

(B) दण्डः

(C) धर्मः

(D) न कोऽपि

**60.** चण्डीमाहात्म्यं कस्मिन् महापुराणे वर्तते?

(A) विष्णुपुराणे

(B) अग्निपुराणे

(C) मार्कण्डेयपुराणे

(D) न कस्मिन्नपि

**61.** बालकः + अयम् = अत्र सन्धिबद्धं पदं किम्?

(A) बालकोऽयम्

(B) बालक अयम्

(C) बालको अयम्

(D) न किमपि

**62.** अर्थशास्त्रस्य प्रथमम् अधिकरणं किम्?

(A) अध्यक्षप्रचारः

(B) विनयाधिकारिकम्

(C) धर्मस्थीयम्

(D) न किमपि

**63.** अश्वघोषविरचितस्य गीतिकाव्यस्य नाम किम्?

(A) 'सौन्दरनन्दम्'

(B) 'शारिपुत्रप्रकरणम्'

(C) 'गण्डीस्तोत्रगाथा'

(D) न किमपि

**64.** 'महाञ्जयः' इत्यस्य सन्धिवियुक्तं रूपं किम्?

(A) महत् + जयः

(B) महान् + जयः

(C) महाञ् + जयः

(D) न किमपि

**65.** अर्थशास्त्रस्य प्रथमे अधिकरणे कति अध्यायाः वर्तन्ते?

(A) एकविंशतिः

(B) पञ्चदश

(C) अष्टादश

(D) विंशतिः

**66.** मृच्छकटिके दृश्यकाव्ये नायिकायाः नाम किम्?

(A) रदनिका

(B) वसन्तसेना

(C) वासवदत्ता

(D) पद्मावती

**67.** अक्ष + ऊहिनी = अत्र निष्पन्नरूपं भवति

(A) अक्षौहिनी

(B) अक्षोहिनी

(C) अक्षौहिणी

(D) न किमपि

**68.** मनोः अनुगामिनां मतानुसारं विद्याः कति?

(A) चतस्रः

(B) सप्त

(C) पञ्च

(D) तिस्रः

**69.** 'कर्पूरमञ्जरी' इति रूपकं कया भाषया विरचिम्?

(A) प्राकृतभाषया

(B) पालिभाषया

(C) संस्कृतभाषया

(D) वङ्गभाषया

**70.** गो + अक्षम् = अत्र सन्धिबद्धं रूपं किम्?

(A) गवाक्षम्

(B) गोऽक्षम्

(C) गवाक्षः

(D) न किमपि

**71.** ''धर्मार्थाविरोधेन ______ सेवेत'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) क्रोधं

(B) लोभं

(C) कामं

(D) न किमपि

**72.** 'पुरुषपरीक्षा' इति कथासाहित्यस्य रचयिता कः?

(A) सोमदेवः

(B) जयदेवः

(C) विद्यापतिः

(D) गुणाढ्यः

**73.** निः + रोगः = अत्र सन्धितपदं भवति

(A) निरोगः

(B) नीरोगः

(C) निःरोगः

(D) न किमपि

**74.** ''पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात्'' —अमात्यनियोगविषये कस्य अभिमतमिदम्?

(A) पिशुनस्य

(B) कौटिल्यस्य

(C) कौणपदन्तस्य

(D) न कस्यापि

**75.** भट्टिविरचिते 'रावणवध'-महाकाव्ये कति सर्गाः वर्तन्ते?

(A) अष्टादश

(B) ऊनविंशतिः

(C) विंशतिः

(D) द्वाविंशतिः

**76.** अधोलिखितेषु कुत्र संहिता न निषिद्धा?

(A) मुनी + इमौ

(B) लते + एते

(C) गतौ + इमौ

(D) साधू + इमौ

**77.** अर्थशास्त्रानुसारम् 'उपजाप'-शब्दस्य अर्थः किम्?

(A) भेदसाधनकर्म

(B) दूतनियोगोपायः

(C) अमात्यनियोगोपायः

(D) न किमपि

**78.** अधोलिखितेषु किं काव्यं कालिदासेन विरचितम्?

(A) 'उत्तररामचरितम्'

(B) 'रघुवंशम्'

(C) 'बुद्धचरितम्'

(D) 'नैषधचरितम्'

**79.** ''प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे _____।'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) प्रथमा

(B) द्वितीया

(C) तृतीया

(D) चतुर्थी

**80.** रुचिरा-छन्दसि प्रतिपादं कति अक्षराणि सन्ति?

(A) चतुर्दश

(B) सप्तदश

(C) एकादश

(D) त्रयोदश

**81.** 'महासिद्धान्त'-ग्रन्थस्य रचयिता कः?

(A) प्रथमः आर्यभट्टः

(B) द्वितीयः आर्यभट्टः

(C) ब्रह्मगुप्तः

(D) न कोऽपि

**82.** 'धनेन मानः' अत्र 'धनेन' इति पदे भवति

(A) करणकारके तृतीया

(B) हेत्वर्थे तृतीया

(C) सहार्थे तृतीया

(D) कर्तरि तृतीया

**83.** समवृत्त-छन्दसि त्रिलघुयुक्तगणस्य नाम किम्?

(A) म-गणः

(B) य-गणः

(C) स-गणः

(D) न-गणः

**84.** वराहमिहिरविरचिते 'पैतामहसिद्धान्त'-ग्रन्थे कति अध्यायाः वर्तन्ते?

(A) द्वादश

(B) चतुर्दश

(C) पञ्चदश

(D) अष्टादश

**85.** ''नृसिंहाय नमस्करोति''—अत्र 'नृसिंहाय' इति पदे भवति

(A) सम्प्रदाने चतुर्थी

(B) 'नमस्'-शब्दयोगे चतुर्थी

(C) कर्मणि चतुर्थी

(D) कर्तरि चतुर्थी

**86.** इन्द्रवज्रा-छन्दसि प्रतिपादं कुत्र यतिः भवति?

(A) पादान्ते

(B) सप्तमे अक्षरे

(C) चतुर्थे अक्षरे

(D) न कुत्रापि

**87.** अधोलिखितेषु कः ग्रन्थः नागार्जुनेन विरचितः?

(A) 'जीवकतन्त्रम्'

(B) 'आरोग्यमञ्जरी'

(C) 'वृहत्संहिता'

(D) न कोऽपि

**88.** ''गोषु दुह्यमानासु देवदत्तः गतः''—अत्र 'गोषु' इति पदे भवति

(A) कर्मणि सप्तमी

(B) कर्तरि सप्तमी

(C) निर्धारणे सप्तमी

(D) अनादरे सप्तमी

**89.** ''वदन्ति _____ जतौ जरौ''—अत्र रिक्तस्थाने भवति

(A) वसन्ततिलकं

(B) वंशस्थविलं

(C) द्रुतविलम्बितं

(D) न किमपि

**90.** 'चरकसंहितायाः' प्रकृतः रचयिता कः?

(A) अग्निवेशः

(B) जीवकः

(C) आत्रेयः

(D) न कोऽपि

**91.** 'निकषा'-शब्दयोगेन का विभक्तिः भवति?

(A) पञ्चमी

(B) तृतीया

(C) द्वितीया

(D) चतुर्थी

**92.** ''रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्''— अस्मिन् चरणे गणाः भवन्ति

(A) त भ ज ज ग ग

(B) न न म य य

(C) म न ज र ग

(D) म त त ग ग

**93.** भोजविरचितस्य 'युक्तिकल्पतरु'-ग्रन्थस्य आलोच्यवस्तु किम्?

(A) चिकित्साशास्त्रम्

(B) वास्तुशास्त्रम्

(C) गणितशास्त्रम्

(D) न किमपि

**94.** 'कृष्णसर्पः' अत्र अधोलिखितेषु कः समासः विधीयते?

(A) कर्मधारयः

(B) द्वन्द्वः

(C) अव्ययीभावः

(D) बहुव्रीहिः

**95.** ''लोकैर्हास्यमानास्ततः स्थानात् स्वदेशं गताः'' कति पण्डिताः स्वदेशं गतवन्तः?

(A) पञ्च

(B) चत्वारः

(C) त्रयः

(D) सप्त

**96.** अधोलिखितेषु किं नाटकं वीरेन्द्रकुमारभट्टाचार्येण विरचितम्?

(A) 'शरणार्थिसंवादम्'

(B) 'बांलादेशविजयम्'

(C) 'भारतलक्ष्मीनाटकम्'

(D) न किमपि

**97.** 'करौ च चरणौ च' इत्यत्र समासबद्धपदं किम्?

(A) करचरणानि

(B) करचरणाः

(C) करचरणम्

(D) न किमपि

**98.** ''दीर्घसूत्री _____'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) नमस्यति

(B) विनश्यति

(C) प्रणश्यति

(D) न किमपि

**99.** विभ्रान्तयुवसमाजम् उद्दिश्य श्रीजीवन्यायतीर्थेन विरचितं नाटकं किम्?

(A) 'स्वातन्त्र्यसन्धिक्षणम्'

(B) 'सिन्धुसौवीरसंग्रामम्'

(C) 'साम्यसागरकल्लोलम्'

(D) न किमपि

**100.** ''तेन सहेति _____'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) सरूपे

(B) तुल्ययोगे

(C) अन्यपदार्थे

(D) न किमपि

**101.** ''चतुर्णां पण्डितमूर्खाणां कथा''-अनुसारं पण्डिताः कैः निमन्त्रिताः?

(A) छात्रैः

(B) ग्रामीणैः

(C) विद्वज्जनैः

(D) बान्धवैः

**102.** आन्तर्जातिकक्षेत्रस्य राजनैतिकसमस्याम् अवलम्ब्य सिद्धेश्वरचट्टोपाध्यायविरचितं नाटकं किम्?

(A) 'धरित्रीपतिनिर्वाचनम्'

(B) 'अथ किम्'

(C) 'स्वर्गीयहसनम्'

(D) 'ननाविताडनम्'

**103.** अधोलिखितेषु अलुक्समासस्य उदाहरणं किम्?

(A) सरोजम्

(B) वनचारी

(C) युधिष्ठिरः

(D) न किमपि

**104.** ''अनेन सदृशो लोके न भूतो न भविष्यति''—कस्य आसीत् एतादृशं चिन्तनम्?

(A) वीरवरस्य

(B) शूद्रकस्य

(C) शक्तिधरस्य

(D) न कस्यापि

**105.** 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थस्य रचयिता कः?

(A) भामहः

(B) वामनः

(C) भरतः

(D) न कोऽपि

**106.** अव्ययीभावः समासः भवति

(A) पूर्वपदार्थप्रधानः

(B) उत्तरपदार्थप्रधानः

(C) उभयपदार्थप्रधानः

(D) अन्यपदार्थप्रधानः

**107.** 'वीरवरकथा'-अनुसारं किमासीत् वीरवरस्य प्रात्यहिकं वर्तनम्?

(A) सुवर्णशतचतुष्टयम्

(B) हीरकशतचतुष्टयम्

(C) रजतशतचतुष्टयम्

(D) न किमपि

**108.** भरतविरचिते नाट्यशास्त्रे कति अध्यायाः वर्तन्ते?

(A) विंशतिः

(B) पञ्चविंशतिः

(C) त्रिंशत्

(D) सप्तत्रिंशत्

**109.** 'भुजोऽनवने' इति सूत्रेण भुज्-धातुः भवति

(A) आत्मनेपदी

(B) परस्मैपदी

(C) उभयपदी

(D) न किमपि

**110.** 'श्रीमद्भगवद्गीतायाः' द्वितीये अध्याये कति श्लोकाः विद्यन्ते?

(A) ऊनसप्ततिः

(B) सप्ततिः

(C) एकसप्ततिः

(D) द्विसप्ततिः

**111.** 'काव्यप्रकाश'-ग्रन्थान्तर्गतस्य परिच्छेदस्य नाम

(A) आननम्

(B) लोचनम्

(C) उल्लासः

(D) न किमपि

**112.** आ-रम् धातुः अधोलिखितेषु किं भवति?

(A) उभयपदी

(B) आत्मनेपदी

(C) परस्मैपदी

(D) न किमपि

**113.** ''इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन।'' अत्र 'पूजार्हौ'-पदेन कौ निर्देशितौ?

(A) भीष्मद्रोणौ

(B) धृतराष्ट्रदुर्योधनौ

(C) दुर्योधनदुःशासनौ

(D) कृष्णार्जुनौ

**114.** साहित्यदर्पणे विश्वनाथेन कति रसाः स्वीकृताः?

(A) सप्त

(B) अष्ट

(C) नव

(D) दश

**115.** पूज् + क्त्वाच् = अत्र निष्पन्नपदं किम्?

(A) पूजित्वा

(B) पूजयित्वा

(C) पूजिता

(D) न किमपि

**116.** कः आसीत् गुडाकेशः?

(A) कृष्णः

(B) द्रोणः

(C) अर्जुनः

(D) न कोऽपि

**117.** ''तददोषौ शब्दार्थौ सगुणावलंकृती पुनः क्वापि''—काव्यलक्षणनिर्णये केन इदमभिमतं व्यक्तम्?

(A) जगन्नाथेन

(B) भामहेन

(C) मम्मटेन

(D) विश्वनाथेन

**118.** प्रशस्य + इष्ठन् = निष्पन्नरूपं किम्?

(A) श्रेष्ठ

(B) प्रेष्ठ

(C) प्रथिष्ठ

(D) न किमपि

**119.** ''नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।'' किमत्र आलोच्यवस्तु?

(A) जगत्

(B) आत्मा

(C) देहम्

(D) न किमपि

**120.** ''अनुप्रासः _____ वैषम्येऽपि स्वरस्य यत्।''
अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) वर्णसाम्यं

(B) ध्वनिसाम्यं

(C) शब्दसाम्यं

(D) न किमपि

**121.** मायाविन् + ङीप् = निष्पन्नरूपं भवति

(A) मायावी

(B) मायाविनी

(C) मायावती

(D) न किमपि

**122.** ''विहाय _____ यः सर्वान् पुमांश्चरति निस्पृहः।''
अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) लोभान्

(B) क्रोधान्

(C) कामान्

(D) न किमपि

**123.** यत्र कारणं विद्यते किन्तु कार्यस्य अभावः दृश्यते तत्र किम् अलंकारः भवति?

(A) विभावना

(B) कारणमाला

(C) विशेषोक्तिः

(D) उत्प्रेक्षा

**124.** 'नमः करोति' इति वाक्यस्य निष्पन्नपदं किम्?

(A) नमस्ते

(B) नमस्यति

(C) नमस्कारः

(D) न किमपि

**125.** ''यावत् जीवेत् सुखं जीवेत्,
ऋणं कृत्वा घृतं पिवेत्।''
इति मतवादः कस्मिन् दर्शने स्वीक्रियते?

(A) बौद्धदर्शने

(B) वेदान्तदर्शने

(C) चार्वाकदर्शने

(D) न कस्मिन्नपि

**126.** साधर्म्येण यत्र सामान्येन विशेषः समर्थ्यते तत्र किम् अलंकारः भवति?

(A) काव्यलिङ्गम्

(B) अर्थान्तरन्यासः

(C) व्याजस्तुतिः

(D) न किमपि

**127.** हन् + सन् + लट् + ति = अत्र रूपं भवति

(A) जिघांसति

(B) जिहासति

(C) जिहसिषति

(D) न किमपि

**128.** दुःखनिरोधार्थं बौद्धदर्शने अनुस्रियते

(A) अष्टाङ्गिकमार्गः

(B) आर्यसत्यचतुष्टयम्

(C) अष्टाङ्गिकयोगः

(D) न किमपि

**129.** 'कमलमिव मुखं मनोज्ञम्'—उपमान् अत्र

(A) कमलम्

(B) इव

(C) मुखम्

(D) मनोज्ञम्

**130.** दृश् + णिच् + लट् + ति = अत्र निष्पन्नपदं भवति

(A) पश्यति

(B) दृश्यते

(C) दर्शयति

(D) न किमपि

**131.** योगदर्शने अष्टयोगाङ्गेषु अन्तिमः योगाङ्गः किम्?

(A) ध्यानम्

(B) प्राणायामः

(C) प्रत्याहारः

(D) समाधिः

**132.** ''रूपकं रूपितारोपो विषये निरपह्नवे।''

अत्र 'विषय'-पदेन किं बुध्यते?

(A) उपमान

(B) उपमेयः

(C) साधारणधर्मः

(D) न किमपि

**133.** दा + यङ् + लट् प्रथमपुरुषस्य एकवचने रूपं भवति

(A) दित्सति

(B) देदीयते

(C) दापयति

(D) न किमपि

**134.** वेदान्तदर्शने ब्रह्मणः स्वगतभेदः केन स्वीकृतः?

(A) शङ्कराचार्येण

(B) पतञ्जलिना

(C) रामानुजेन

(D) न केनापि

**135.** अधोलिखितेषु शृङ्खलामूलकः अलंकारः भवति

(A) उल्लेखः

(B) विभावना

(C) कारणमाला

(D) काव्यलिङ्गम्

**136.** ''रामेण उक्तम्''—केन वाच्येन व्यक्तमिदं वाक्यम्?

(A) कर्तृवाच्येन

(B) कर्मवाच्येन

(C) भाववाच्येन

(D) न केनापि

**137.** भारतीयदर्शने मायावादस्य प्रवक्ता कः?

(A) कपिलः

(B) रामानुजः

(C) कणादः

(D) शङ्कराचार्यः

**138.** 'धर्म > धम्म' इत्यत्र ध्वनिपरिवर्तनस्य नाम किम्?

(A) प्रगतसमीभवनम्

(B) परागतसमीभवनम्

(C) अन्योन्यसमीभवनम्

(D) न किमपि

**139.** ''शिवं प्रणम्य गृहं गच्छति माता।'' अस्मिन् वाक्ये अव्ययपदं किम्?

(A) शिवम्

(B) प्रणम्य

(C) गृहम्

(D) न किमपि

**140.** 'ब्रह्मसूत्रम्' अवलम्ब्य रामानुजेन विरचितं भाष्यं किम्?

(A) श्रीभाष्यम्

(B) आभासभाष्यम्

(C) शारीरिकभाष्यम्

(D) न किमपि

141. 'इन्द्र > इन्दर' इत्यत्र ध्वनिपरिवर्तनस्य नाम

(A) वर्णविपर्ययः

(B) अपिनिहितिः

(C) विषमीभवनम्

(D) स्वरभक्तिः

142. अधोलिखितेषु कः पूरणवाचकः शब्दः?

(A) सहस्रम्

(B) शतम्

(C) शततमः

(D) न कोऽपि

143. भारतीयदर्शने अधोलिखितेषु कस्य मतवादस्य प्रवक्ता शङ्कराचार्यः?

(A) विशिष्टाद्वैतवादस्य

(B) अद्वैतवादस्य

(C) द्वैतवादस्य

(D) न कस्यापि

144. अधोलिखितेषु स्वरागमस्य उदाहरणं किम्?

(A) स्त्री > इस्त्री

(B) वाराणसी > वेणारसी

(C) भवति > भवैति

(D) न किमपि

145. पाठ्यांशान्तर्गते ऋग्वेदीये अग्निसूक्ते कति मन्त्राः वर्तन्ते?

(A) नव

(B) दश

(C) एकादश

(D) चतुर्दश

146. तर्कसंग्रहानुसारं कस्य पदार्थस्य परमपरं चेति विभागद्वयं प्राप्यते?

(A) द्रव्यस्य

(B) गुणस्य

(C) सामान्यस्य

(D) न कस्यापि

147. अधोलिखितेषु पालिभाषया विरचितः ग्रन्थः किम्?

(A) 'त्रिपिटकः'

(B) 'गाथासप्तशती'

(C) 'गौडवधः'

(D) 'दशमुखवधः'

148. ''जाया तप्यते कितवस्य हीना''

अधोलिखितेषु कस्मिन् सूक्ते वर्तते अयं मन्त्रांशः?

(A) संज्ञानसूक्ते

(B) देवीसूक्ते

(C) अक्षसूक्ते

(D) न कुत्रापि

149. तर्कसंग्रहानुसारम् अधोलिखितेषु किं न कर्म?

(A) आकुञ्चनम्

(B) प्रसारणम्

(C) गमनम्

(D) अपरम्

150. अधोलिखितेषु 'शतम्' इति भाषागुच्छान्तर्गता भाषा किम्?

(A) केल्तिकभाषा

(B) इतालीयभाषा

(C) ग्रीकभाषा

(D) इन्दो-इराणीयभाषा

**READ THE FOLLOWING INSTRUCTIONS CAREFULLY :**

**নিম্নলিখিত নির্দেশাবলী ভালো করে পড়ুন :**

1. Out of the four alternatives for each question, only one circle for the correct answer is to be darkened completely with Black Ballpoint Pen on the OMR Answer Sheet. The answer once marked is not liable to be changed.

   প্রতিটি প্রশ্নের উত্তর হিসাবে যে চারটি বিকল্প দেওয়া আছে তা থেকে শুধুমাত্র শুদ্ধ উত্তরটির প্রেক্ষিতে OMR উত্তরপত্রে দেওয়া বৃত্তটি কালো বলপয়েন্ট কলম দ্বারা সম্পূর্ণরূপে কালো করে চিহ্নিত করতে হবে। একবার উত্তর চিহ্নিত করা হয়ে গেলে তাকে আর পরিবর্তন করা যাবে না।

2. The candidates should ensure that the Answer Sheet is not folded. Do not make any stray marks on the Answer Sheet. Do not write your Roll No. anywhere else except at the specified space on the OMR Answer Sheet.

   পরীক্ষার্থীরা কোনোভাবেই OMR উত্তরপত্রটি ভাঁজ করবেন না। OMR উত্তরপত্রে কোনোরকম দাগ কাটা বা মন্তব্য লেখা যাবে না। পরীক্ষার্থীরা তাঁদের রোল নম্বর উত্তরপত্রে নির্দিষ্ট করা জায়গা ছাড়া অন্য কোনো জায়গায় লিখবেন না।

3. Handle the Question Booklet and Answer Sheet with utmost care, as under no circumstances (except technical defect), another set of Question Booklet and OMR Answer Sheet will be provided.

   OMR উত্তরপত্র এবং প্রশ্নপত্রের ব্যবহারে সার্বিক সতর্কতা অবলম্বন করতে হবে। কোনো অবস্থাতেই (মুদ্রণ ত্রুটি ও পদ্ধতিগত ত্রুটি ছাড়া) OMR উত্তরপত্র ও প্রশ্নপত্র পাল্টে দেওয়া যাবে না।

4. The candidates will write the correct Question Booklet Number and OMR Answer Sheet Number in the Attendance Sheet.

   পরীক্ষার্থীকে অ্যাটেন্ডেন্স শীট-এ তাঁর OMR উত্তরপত্রের নম্বর এবং প্রশ্নপত্রের নম্বর নির্ভুলভাবে লিখতে হবে।

5. Candidates are not allowed to carry any textual material, printed or written, bits of papers, pager, mobile phone, electronic devices or any other material except the Admit Card and Photo Identity Card inside the Examination Hall/Room.

   পরীক্ষার্থীকে অ্যাডমিট কার্ড এবং ফটো আইডেনটিটি কার্ড ছাড়া অন্য কোনো ছাপানো বা লেখা কাগজ, পঠন ও মুদ্রণজাত সামগ্রী, পেজার, মোবাইল ফোন, অন্য কোনোরকম ইলেক্ট্রনিক ডিভাইস নিয়ে পরীক্ষা হলে/কক্ষে প্রবেশ করতে দেওয়া হবে না।

6. Each candidate must show on demand his/her Admit Card and Photo Identity Card to the Invigilator/Examination Officials.

   পরীক্ষা হলে ইনভিজিলেটর কর্তৃক কিংবা পরীক্ষা কেন্দ্রের ভিতরে পরীক্ষা-সংশ্লিষ্ট আধিকারিক কর্তৃক দাবি করা হলে প্রত্যেক পরীক্ষার্থী তাঁর অ্যাডমিট কার্ড ও ফটো আইডেনটিটি কার্ড দেখাতে বাধ্য থাকবেন।

7. No candidate, without special permission of the Centre Superintendent or Invigilator, should change his/her seat.

   সেন্টার সুপারিনটেনডেন্ট বা ইনভিজিলেটর-এর বিশেষ অনুমতি ছাড়া পরীক্ষার্থী পরীক্ষা হলে তাঁর বসার স্থান পরিবর্তন করতে পারবেন না।

8. Candidates will have to sign twice in the Attendance Sheet presented by the Invigilator on duty; first after taking their seats in the Examination Hall/Room and second at the time of handing over their OMR Answer Sheet to the Invigilator.

   পরীক্ষার্থীদিগকে ইনভিজিলেটরের দেওয়া অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর করতে হবে, প্রথমবার পরীক্ষা হলে তাঁদের আসন গ্রহণের পর এবং দ্বিতীয়বার ইনভিজিলেটরের নিকট OMR উত্তরপত্র জমা দেওয়ার সময়ে।

9. The candidates should not leave the Examination Hall/Room without handing over their OMR Answer Sheet to the Invigilator on duty and without signing the Attendance Sheet twice. Cases where a candidate has not signed the Attendance Sheet a second time will be deemed not to have handed over the Answer Sheet and dealt with as an unfair means case.

   অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর করা এবং কর্তব্যরত ইনভিজিলেটর-এর নিকট উত্তরপত্র জমা দেওয়া ব্যতীত কোনো পরীক্ষার্থী পরীক্ষা হল ত্যাগ করতে পারবেন না। যদি কোনো পরীক্ষার্থী অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর না করেন তবে তিনি তাঁর OMR উত্তরপত্র জমা করেননি বলে গণ্য হবে এবং তা অনুচিত কার্য হিসাবে ধরা হবে।

10. Use of any type of calculating device is prohibited.

    যে কোনো ধরনের ক্যালকুলেটরের ব্যবহার সম্পূর্ণরূপে নিষিদ্ধ।

11. The candidates are governed by all the rules and regulations of the Board with regard to their conduct in the Examination Hall/Room. All cases of unfair means will be dealt with as per rules and regulations of the Board.

    পরীক্ষা হল/কক্ষের মধ্যে পরীক্ষার্থীর আচরণ বোর্ডের নিয়ম ও নির্দেশিকা অনুযায়ী চালিত হবে। সব ধরনের অনুচিত কার্য বোর্ডের নিয়ম ও নির্দেশিকা অনুযায়ী নির্দিষ্ট হবে।

12. No part of the Question Booklet and OMR Answer Sheet shall be detached under any circumstances.

    কোনো অবস্থাতেই প্রশ্নপত্র এবং OMR উত্তরপত্রের কোনো অংশ ছেঁড়া বা আলাদা করা যাবে না।

13. On completion of the test, the candidate must hand over the OMR Answer Sheet to the Invigilator in the Hall/Room. The candidates are allowed to take away the Question Booklet with them.

    পরীক্ষা শেষ হওয়ার পরে পরীক্ষার্থী অবশ্যই তাঁর OMR উত্তরপত্র কর্তব্যরত ইনভিজিলেটরের কাছে জমা দেবেন। পরীক্ষার্থীরা প্রশ্নপত্রটি তাঁদের সাথে নিয়ে যেতে পারেন।